श्री वीतरागाय नमः

न्यायावतारः तत्त्वार्थसूत्रं

श्रीमदानन्दसागरसूरिवर्यैर्दृब्धं परिशिष्टं च.

अमदावाद निवासी

शा. डाह्याभाइ पीतांबरदास तरफथी

साधुसाध्वी तथा तेना संग्रहकोने भेट.

योजी छपावी प्रसिद्ध करनार.

मास्तर उमेदचंद रायचंद.

पांजरापोळ—अमदावाद.

संवत् १९७५ वी.सं. २४४५ सन १९१९

प्रथमावृत्ती प्रत १०००

भेट पोष्टनो ०)०॥ मोकली मंगाववी.

मळवानां ठेकाणां.

शा. डाह्याभाइ पीतांबरदास मुंबइ पोष्ट नं. २

जकरीआ मसीद त्रीकमलाल गोपाळदासनी दुकाने

शा. मांकळचंद पीतांबरदास

अमदावाद ढीकाभटनी पोळ.

मास्तर उमेदचंद रायचंद पांजरापोळ.

मु. अमदावाद.

शांतिविजय प्रीन्टींग प्रेसमां इश्वरलाल केशवलाल
वकील तथा माणेकलाल माधवजीए छाप्यो.
ठे. ढींकवा चोकी—अमदावाद.

श्री वीतरागाय नमः

न्यायावतारः तत्त्वार्थसूत्रं श्रीमदानन्दसागरसूरिवरैर्दृब्धं परिशिष्टं च.

अमदावाद निवासी

शा. डाह्याभाइ पीतांबरदास तरफथी

साधुसाध्वी तथा तेना संग्रहकोने भेट.

योजी छपावी प्रसिद्ध करनार.

मास्तर उमेदचंद रायचंद.

पांजरापोळ—अमदावाद.

संवत १९७५ वी.सं. २४४५ सन १९१९

प्रथमावृत्तौ प्रत १०००

(भेट) पोष्टनो ०)०।। मोकली मंगाववी.

न्यायावतारमूलम्.

प्रमाणव्युत्पादनार्थमिदमारभ्यते—

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥१॥
प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥२॥
प्रसिद्धानां प्रमाणानां लक्षणोक्तौ प्रयोजनम् ।
तद्व्यामोहनिवृत्तिःस्यात् व्यामूढमनसामिह ॥३॥
अपरोक्षतयाऽर्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरज्ज्ञेयं परोक्षं ग्रहणेक्षया ॥४॥
साध्याविनाभुवो लिङ्गात् साध्यनिश्चायकं स्मृतम्
अनुमानं तदभ्रान्तं प्रमाणत्वात् समक्षवत् ॥५॥
न प्रत्यक्षमपि भ्रान्तं प्रमाणत्वविनिश्चयात् ।
भ्रान्तं प्रमाणमित्येतद्विरुद्धं वचनं यतः ॥६॥
सकलप्रतिभासस्य भ्रान्तत्वासिद्धितः स्फुटम् ।

प्रमाणं स्वान्यनिश्चायि द्वयसिद्धौ प्रसिध्यति ॥७॥
दृष्टेष्टाव्याहताद् वाक्यात् परमार्थाभिधायिनः ।
तत्त्वग्राहितयोत्पन्नं मानं शाब्दं प्रकीर्तितम् ॥८॥
आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् ।
तत्त्वोपदेशकृत् सार्वं शास्त्रं कापथघट्टनम् ॥९॥
स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः ।
परार्थं मानमाख्यातं वाक्यं तदुपचारतः ॥१०॥
प्रत्यक्षेणानुमानेन प्रसिद्धार्थप्रकाशनात् ।
परस्य तदुपायत्वात् परार्थत्वं द्वयोरपि ॥११॥
प्रत्यक्षप्रतिपन्नार्थप्रतिपादि च यद्वचः ।
प्रत्यक्षप्रतिभासस्य निमित्तत्त्वात् तदुच्यते ॥१२॥
साध्याविनाभुवो हेतोर्वचो यत्प्रतिपादकम् ।
परार्थमनुमानं तत् पक्षादिवचनात्मकम् ॥१३॥
साध्याभ्युपगमः पक्षः प्रत्यक्षाद्यनिराकृतः ।
तत्प्रयोगोऽत्र कर्त्तव्यो हेतोर्गोचरदीपकः ॥१४॥

अन्यथा वाद्यभिप्रेतहेतुगोचरमोहिनः ।
प्रत्याय्यस्य भवेद्धेतुर्विरुद्धारेकितो यथा ॥१५॥
धानुष्कगुणसंप्रेक्षिजनस्य परिविध्यतः ।
धानुष्कस्य विना लक्ष्यनिर्देशेन गुणेतरौ ॥१६॥
हेतोस्तथोपपत्त्या वा स्यात् प्रयोगोऽन्यथापि वा
द्विविधोऽन्यतरेणापि साध्यसिद्धिर्भवेदिति ॥१७॥
साध्यसाधनयोर्व्याप्तिर्यत्र निश्चीयतेतराम् ।
साधर्म्येण स दृष्टान्तः सम्बन्धस्मरणान्मतः १८
साध्ये निवर्त्तमाने तु साधनस्याप्यसंभवः ।
ख्याप्यते यत्र दृष्टान्ते वैधर्म्येणेति स स्मृतः १९
अन्तर्व्याप्त्यैव साध्यस्य सिद्धेर्बहिरुदाहृतिः ।
व्यर्था स्यात् तदसद्भावेऽप्येवं न्यायविदो विदुः२०
प्रतिपाद्यस्य यः सिद्धः पक्षाभासोऽक्षिलिङ्गतः
लोकस्ववचनाभ्यां च बाधितोऽनेकधा मतः २१
अन्यथाऽनुपपन्नत्वं हेतोर्लक्षणमीरितम् ।

तदप्रतीतिसन्देहविपर्यासैस्तदाभता ॥२२॥
असिद्धस्त्वप्रतीतो यो योऽन्यथैवोपपद्यते ।
विरुद्धो योऽन्यथाऽप्यत्र युक्तोऽनैकान्तिकः स तु
साधर्म्येणात्र दृष्टान्ते दोषा न्यायविदीरिताः ।
अपलक्षणहेतूत्थाः साध्यादिविकलादयः ॥२४॥
वैधर्म्येणात्र दृष्टान्ते दोषा न्यायविदीरिताः
साध्यसाधनयुग्मानामनिवृत्तेश्च संशयात्॥२५॥
वाद्युक्ते साधने प्रोक्तदोषाणामुद्भावनम् ।
दूषणं निरवद्ये तु दूषणाभासनामकम् ॥२६॥
सकलावरणमुक्तात्मा केवलं यत् प्रकाशते ।
प्रत्यक्षं सकलार्थात्मसततप्रतिभासनम् ॥२७॥
प्रमाणस्य फलं साक्षादज्ञानविनिवर्त्तनम् ।
केवलस्य सुखोपेक्षे शेपस्यादानहानधीः॥२ ॥
अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ।
एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः ॥२९॥

नयानामेकनिष्ठानां प्रवृत्तेः श्रुतवर्त्मनि ।
सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यते ॥३०॥
प्रमाता स्वान्यनिर्भासी कर्ता भोक्ता विवृत्तिमान् ।
स्वसंवेदनसांसिद्धो जीवः क्षित्याद्यनात्मकः ३१॥
प्रमाणादिव्यवस्थेयमनादिनिधनात्मिका ।
सर्वसंव्यवहर्तॄणां प्रसिद्धापि प्रकीर्तिता ॥३२॥

इति श्रीसिद्धसेनदिवाकर प्रणीतो न्यायावतारः



॥ श्री तत्त्वार्थसूत्रम् ॥

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १ ॥ तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ २ ॥ तन्निसर्गादधिगमाद्वा ॥ ३ ॥ जीवाजीवाश्रवबंधसंवरनिर्जरामोक्षास्तत्त्वम् ॥ ४ ॥ नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥५॥ प्रमाणनयैरधिगमः ॥ ६ ॥ निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ७ ॥ मतिश्रुतावधिमनःप-

र्यायकेवलानि ज्ञानम् ॥ ८ ॥ सत्सं-
ख्याक्षेत्रस्पर्शनकालांतरभावाल्पब-
हुत्वैश्च॥९॥तत्प्रमाणे॥१०॥आद्ये परो-
क्षम् ॥११॥प्रत्यक्षमन्यत्॥१२॥ मतिः
स्मृतिःसंज्ञा चिंताऽभिनिबोध इत्यन-
र्थांतरम् ॥ १३ ॥ तदिंद्रियानिंद्रिय-
निमित्तम् ॥ १४ ॥ अवग्रहेहापाय-
धारणाः ॥१५॥ बहुबहुविधक्षिप्रा-
निश्रितासंदिग्धध्रुवाणां सेतराणाम्
॥१६॥ अर्थस्य ॥१७॥ व्यंजनस्याव-
ग्रहः ॥१८॥ न चक्षुरनिंद्रियाभ्याम्
॥ १९ ॥ श्रुतं मतिपूर्वं द्व्यनेकद्वाद-

शब्देदम् ॥२०॥ द्विविधोऽवधिः॥२१॥ भवप्रत्ययो नारकदेवानाम् ॥ २२ ॥ यथोक्तनिमित्तः षड्विकल्पः शेषाणाम् ॥ २३ ॥ ऋजुविपुलमती मनःपर्यायः ॥ २४ ॥ विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ २५ ॥ विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्याययोः ॥ २६ ॥ मतिश्रुतयोर्निबंधः सर्वद्रव्येष्वसर्वपर्यायेषु ॥२७॥ रूपिष्ववधेः ॥२८॥ तदनंतभागे मनःपर्यायस्य ।.२९॥ सर्वद्रव्यपर्यायेषु केवलस्य ॥ ३० ॥ एकादीनि भाज्यानि

युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३१ ॥ मतिश्रुतावधयो (मतिश्रुतविभंगा) विपर्ययश्च ॥ ३२ ॥ सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥ ३३ ॥ नैगमसंग्रहव्यवहारर्जुसूत्रशब्दा नयाः।३४। आद्यशब्दौ द्वित्रिभेदौ ।३५।

। इति प्रथमोऽध्यायः ।

॥ अथ द्वितीयोऽध्यायः ॥

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥१॥ द्विनवाष्टादशैक-

त्रिंशतित्रिभेदा यथाक्रमम् ॥२॥ स-
म्यक्त्वचारित्रे ॥३॥ ज्ञानदर्शनदान-
लाभभोगोपभोगवीर्याणि च ॥ ४ ॥
ज्ञानाज्ञानदर्शनदानादिलब्धयश्च-
तुस्त्रित्रिपंचभेदाः सम्यक्त्वचारित्र-
संयमासंयमाश्च ॥ ५ ॥ गतिकषाय-
लिंगमिथ्यादर्शनाज्ञाना संयतासिद्ध-
त्वलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भे-
दाः॥६॥ जीवभव्याभव्यत्वादीनि च
॥ ७ ॥ उपयोगो लक्षणम् ॥८॥ स
द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥ संसारि-
णो मुक्ताश्च ॥१०॥ समनस्काऽम-

न्स्काः ॥११॥ संसारिणस्त्रसस्थावरा: ॥१२॥ पृथिव्यंबुवनस्पतय स्थावराः॥१३॥ तेजोवायू द्वींद्रियादयश्च त्रसाः ॥१४॥ पंचेंद्रियाणि ॥ १५ ॥ द्विविधानि ॥ १६ ॥ निर्वृत्त्युपकरणे द्रव्येंद्रियम् ॥ १७ ॥ लब्ध्युपयोगौ भावेंद्रियम् ॥१८॥ उपयोगः स्पर्शादिषु॥ १९॥ स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि॥ २०॥ स्पर्शरसगंधरूपशब्दास्तेषामर्थः॥२१॥ श्रुतमनिंद्रियस्या ॥ २२ ॥ वाय्वंतानामेकं ॥२३॥ कृमिपिपीलिकाभ्रमरमनुष्यादीनामे-

कैकवृद्धानि ॥२४॥ संज्ञिनः समनस्काः॥ २५ ॥ विग्रहगतौ कर्मयोगः ॥२६॥ अनुश्रेणि गतिः ॥२७॥ अविग्रहा जीवस्य ॥ २८ ॥ विग्रहवती च संसारिणः प्राक् चतुर्भ्यः॥२९॥ एकसमयोऽविग्रहः ॥३०॥ एकं द्वौ वाऽनाहारकः ॥ ३१ ॥ संमूर्छनगर्भोपपाता जन्म॥ ३२॥ सचित्तशीतसंवृत्ताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥३३॥ जरायुजाण्डपोतजानां गर्भः ॥३४॥ नारकदेवानामुपपातः ॥ ३५ ॥ शेषाणां संमूर्छनम् ॥३६॥ औदारिकवैक्रिया-

हारकतैजसकार्मणानि शरीराणि॥३६॥ परं परं सूक्ष्मम् ॥३८॥ प्रदेशतोऽसं-ख्येयगुणं प्राक्तैजसात् ॥३९॥ अनंतगुणे परे ॥४०॥ अप्रतिघाते ॥४१॥ अनादिसंबन्धे च॥४२॥ सर्वस्य॥४३॥ तदादीनि भाज्यानि युगपदेकस्या-चतुर्भ्यः ॥ ४४ ॥ निरुपभोगमन्त्यम् ॥४५॥ गर्भसंमूर्छनजमाद्यम्॥४६॥वै-क्रियमौपपातिकम् ॥४७॥ लब्धिप्र-त्ययं च ॥ ४८ ॥ शुभं विशुद्धमव्या-घाति चाहारकं चतुर्दशपूर्वधरस्यैव ॥४९॥ तैजसमपि ॥५०॥ नारकसंमू-

र्हिनो नपुंसकानि ॥ ५१ ॥ न देवाः
॥५२॥ औपपातिकचरमदेहोत्तमपु-
रुषासंख्येयवर्षायुषोऽनपवर्त्यायुषः ५३

। इति द्वितीयोऽध्यायः ।

॥ अथ तृतीयोऽध्यायः ॥

रत्नशर्करावालुकापंकधूमतमोम-
हातमःप्रभाभूमयो घनांबुवाताका-
शप्रतिष्ठाः सप्ताधोऽधः पृथुतराः ।१।
तासु नारकाः ॥२॥ नित्याशुभतरले-
श्यापरिणामदेहवेदनाविक्रियाः ॥३॥

परस्परोदीरितदुःखाः ॥ ४ ॥ संक्लि-
ष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः
॥ ५ ॥ तेष्वेकत्रिसप्तदशसप्तदश-
द्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वा-
नां परा स्थितिः ॥६॥ जंबूद्वीपलवणादयः
शुभनामानो द्वीपसमुद्राः ॥७॥ द्वि-
र्द्विर्विष्कंभाः पूर्वं पूर्वपरिक्षेपिणो व-
लयाकृतयः ॥८॥ तन्मध्ये मेरुनाभि-
र्वृत्तो योजनशतसहस्रविष्कंभो जम्बू-
द्वीपः ॥९॥ तत्र भरतहैमवतहरिवि-
देहरम्यकहैरण्यवतैरावतवर्षाः क्षे-
त्राणि ॥१०॥ तद्विभाजिनः पूर्वापरा-

यता हिमवन्महाहिमवन्निषधनील-
रुक्मिशिखरिणो वर्षधरपर्वताः ॥११॥
द्विर्धातकीखण्डे ॥ १२ ॥ पुष्करार्धे च
॥ १३ ॥ प्राक् मानुषोत्तरान्मनुष्याः
॥१४॥आर्या म्लेशाश्च ॥१५॥ भरतै-
रावतविदेहाः कर्मभूमयोऽन्यत्र देव-
कुरूत्तरकुरुभ्यः ॥१६॥ नृस्थिती प-
रापरे त्रिपल्योपमांतर्मुहूर्ते ॥ १७ ॥
तिर्यग्योनीनां च ॥ १८ ॥

॥ इति तृतीयोऽध्यायः ॥

॥ अथ चतुर्थोऽध्यायः ॥

देवाश्चतुर्निकायाः ॥ १ ॥ तृतीयः पीतलेश्यः ॥ २ ॥ दशाष्टपंचद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥ ३ ॥ इंद्रसामानिकत्रायस्त्रिंशपारिषद्यात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः ॥४॥ त्रायस्त्रिंशलोकपालवर्ज्या व्यंतरज्योतिष्काः ॥५॥ पूर्वयोर्द्वींद्राः ॥ ६ ॥ पीतांतलेश्याः ॥७॥ कायप्रवीचारा आ ऐशानात् ॥८॥ शेषाः स्पर्शरूपशब्दमनःप्रवीचारा द्वयोर्द्वयोः ॥९॥ परेऽ-

प्रवीचाराः ॥१०॥ भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥११॥ व्यंतराः किंनरकिंपुरुषमहोरगगांधर्वयक्षराक्षसभूतपिशाचाः॥१२॥ ज्योतिष्काः सूर्याचंद्रमसौ ग्रहनक्षत्रप्रकीर्णतारकाश्च ॥१३॥ मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥१४॥ तत्कृतः कालविभागः ॥१५॥ बहिरवस्थिताः ॥१६॥ वैमानिकाः ॥१७॥ कल्पोपपन्नाः कल्पातीताश्च ॥१८॥ उपर्युपरि ॥ १९ ॥ सौधर्मैशानसनत्कुमारमाहेंद्रब्रह्म-

लोकलांतकमहाशुक्रसहस्रारेष्वान-
तप्राणतयोरारणाच्युतयोर्नवसु ग्रैवे-
यकेषु विजयवैजयंतजयंतापराजिते-
षु सर्वार्थसिद्धे च ॥२०॥ स्थितिप्रभा-
वसुखद्युतिलेश्याविशुद्धींद्रियावधि-
विषयतोऽधिकाः ॥२१॥ गतिशरीरप-
रिग्रहाभिमानतो हीनाः ॥२२॥ उ-
च्छ्वासाहारवेदनोपपातानुभावतश्च
साध्याः ॥ २३ ॥ पीतपद्मशुक्लेलश्या
द्वित्रिशेषेषु ॥ २४ ॥ प्राग्ग्रैवेयकेभ्यः
कल्पाः ॥२५॥ ब्रह्मलोकालया लोकां-
तिका ॥ २६ ॥ सारस्वतादित्यवन्ह्य-

रुणगर्दतोयतुषिताव्याबाधामरुतः२७
विजयादिषु द्विचरमाः ॥ २८ ॥ औ-
पपातिकमनुष्येभ्यःशेषास्तिर्यग्योन-
यः ॥२९॥ स्थितिः ॥ ३० ॥ भवनेषु
दक्षिणार्धाधिपतीनां पल्योपममध्य-
र्धम् ॥३१॥ शेषाणां पादोने ॥ ३२ ॥
असुरेंद्रयोः सागरोपममधिकं च॥३३॥
सौधर्मादिषु यथाक्रमम् ॥३४॥ सा-
गरोपमे ॥३५॥ अधिके च ॥ ३६ ॥
सप्त सनत्कुमारे ॥ ३७ ॥ विशेषत्रिस-
सदशैकादशत्रयोदशपंचदशभिरधि-
कानि च ॥३८॥ आरणाच्युतादूर्ध्व-

मेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च ॥३९॥ अपरा पल्योपममधिकं च ॥४०॥ सागरोपमे ॥४१॥ अधिके च ॥४२॥ परतः परतः पूर्वा पूर्वानंतरा ॥४३॥ नारकाणां च द्वितीयादिषु ॥४४॥ दश वर्षसहस्राणि प्रथमायाम् ॥४५॥ भवनेषु च ॥४६॥ व्यंतराणां च ॥४७॥ परा पल्योपमम् ॥४८॥ ज्योतिष्काणामधिकम् ॥४९॥ ग्रहाणामेकम् ॥५०॥ नक्षत्राणामर्द्धम् ॥५१॥ तारकाणां चतुर्भागः ॥५२॥ जघन्या त्वष्टभागः ॥५३॥ चतुर्भागः

शेषाणाम् ॥५४॥

॥ इति चतुर्थोऽध्यायः ॥

॥ अथ पञ्चमोऽध्यायः ॥

अजीवकाया धर्माधर्माकाशपुद्गलाः ॥१॥ द्रव्याणि जीवाश्च ॥ २ ॥ नित्यावस्थितान्यरूपीणि ॥३॥ रूपिणः पुद्गलाः ॥४॥ आऽऽकाशादेकद्रव्याणि॥५॥ निष्क्रियाणि ॥ ६ ॥असंख्येयाः प्रदेशा धर्माधर्मयोः॥७॥ जीवस्य च ॥८॥ आकाशस्यानंताः॥९॥ संख्येयासंख्येयाश्च पुद्गलानाम्॥१०॥

नाणोः ।११।लोकाकाशेऽवगाहः ।१२।
धर्माधर्मयोःकृत्स्ने ॥ १३ ॥ एकप्रदे-
शादिषु भाज्यःपुद्गलानाम् ॥ १४ ॥
असंख्येयभागादिषु जीवानाम्।१५।
प्रदेशसंहारविसर्गाभ्यां प्रदीपवत्।१६
गतिस्थित्युपग्रहो धर्माधर्मयोरुपका-
रः ॥१७॥ आकाशस्यावगाहः ॥१८॥
शरीरवाङ्मनःप्राणापानाःपुद्गलाना-
म् ॥ १९ ॥ सुखदुःखजीवितमरणो-
पग्रहाश्च ॥२०॥ परस्परोपग्रहो जी-
वानाम् ॥२१॥ वर्त्तना परिणामः क्रि-
या परत्वापरत्वे च कालस्य ॥ २२ ॥

स्पर्शरसगंधवर्णवंतः पुद्गलाः ॥२३॥
शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभे-
दतमश्छायातपोद्योतवंतश्च ॥ २४ ॥
अणवः स्कंधाश्च ॥२५॥ संघातभेदे-
भ्य उत्पद्यंते ॥२६॥ भेदादणुः॥२७॥
भेदसंघाताभ्यां चाक्षुषाः ॥ २८ ॥
उत्पादव्ययध्रौव्ययुक्तं सत् ॥ २९ ॥
तद्भावाव्ययं नित्यम् ॥ ३० ॥ अर्पि-
तानर्पितसिद्धेः ॥ ३१ ॥ स्निग्धरूक्ष-
त्वाद्बंधः ॥३२॥ न जघन्यगुणानाम्
॥३३॥ गुणसाम्ये सदृशानाम् ॥३३॥
॥३४॥ द्व्यधिकादिगुणानां तु ॥३५॥

बंधे समाधिकौ पारिणामिकौ ॥३६॥ गुणपर्यायवद् द्रव्यम् ॥३७॥ कालश्चेत्येके ॥३८॥ सोऽनंतसमयः ॥ ३९ ॥ द्रव्याश्रया निर्गुणा गुणाः ॥४०॥ तद्भावः परिणामः ॥ ४१ ॥ अनादिरादिमाँश्च ॥४२॥ रूपिष्वादिमान् ॥४३॥ योगोपयोगौ जीवेषु ॥ ४४ ॥

॥ इति पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः

कायवाङ्मनःकर्म योगः ॥१॥ स आस्रवः ॥२॥ शुभः पुण्यस्य ॥३॥

अशुन्न पापस्य ॥ (शेषं पापम्) ॥४॥
सकषायाकषाययोः सांपरायिकेर्यापथयोः ॥५॥ इंडियकषायाव्रतक्रियाः
पंचचतुःपंचपंचाविंशतिसंख्याः पूर्वस्य न्नेदाः ॥६॥ तीव्रमंदज्ञाताज्ञातन्नाववीर्याधिकरणविशेषेन्यस्तद्विशेषः (विशेषात्तद्विशेषः) ॥ ७ ॥ अधिकरणं जीवाजीवाः ॥ ८ ॥ आद्यं
संरंन्नसमारंन्नारंन्नयोगकृतकारितानुमतिकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ए ॥ निर्वर्त्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिन्नेदाः परं॥१०॥

तत्प्रदोषनिन्हवमात्सर्यांतरायासा-
दनोपघाता ज्ञानदर्शनावरणयोः॥११॥
दुःखशोकतापाक्रंदनवधपरिदेवनां-
न्यात्मपरोभयस्थान्यसद्वेद्यस्य ॥१२॥
भूतव्रत्यनुकंपादानसरागसंयमादि-
योगक्षांतिशौचमिति सद्वेद्यस्य॥१३॥
केवलिश्रुतसंघधर्मदेवावर्णवादो द-
र्शनमोहस्य ॥१४॥ कषायोदयात्ती-
व्रात्मपरिणामश्चारित्रमोहस्य ॥१५॥
बह्वारंभपरिग्रहत्वं च नारकस्यायुषः
॥१६॥ माया तैर्यग्योनस्य ॥ १७ ॥
अल्पारंभपरिग्रहत्वं स्वभावमार्दवा-

र्जवत्वं च मानुषस्य ॥१८॥ निःशी-
लव्रतत्वं च सर्वेषां ॥१९॥ सरागसं-
यमसंयमासंयमाकामनिर्जराबालत-
पांसि देवस्य ॥२०॥ योगवक्रतावि-
संवादनं चाशुभस्य नाम्नः ॥ २१ ॥
विपरीतं शुभस्य ॥ २२ ॥ दर्शनवि-
शुद्धिर्विनयसंपन्नता शीलव्रतेष्वनति-
चारोऽभीक्ष्णं ज्ञानोपयोगसंवेगौ श-
क्तितस्त्यागतपसी संघसाधुसमाधि-
वैयावृत्यकरणमर्हदाचार्यबहुश्रुतप्र-
वचनभक्तिरावश्यकापरिहाणिर्मार्ग-
प्रभावना प्रवचनवत्सलत्वमिति ती-

र्ये गोत्रस्य ॥२३॥ परात्मनिंदाप्रशंसे सदसद्गुणाच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२४॥ तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥२५॥ विघ्नकरणमंतरायस्य ॥२६॥

॥ इति षष्ठोऽध्यायः ॥

॥ अथ सप्तमोऽध्यायः ॥

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥ १ ॥ देशसर्वतोऽणुमहती ॥२॥ तत्स्थैर्यार्थं भावनाः पंच पंच ॥३॥ हिंसादिष्विहामुत्र चापा-

यावद्यदर्शनम् ॥४॥ दुःखमेव वा।५।
मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि स-
त्त्वगुणाधिकक्लिश्यमानाविनेयेषु ।६।
जगत्कायस्वभावौ च संवेगवैराग्या-
र्थम् ॥ ७ ॥ प्रमत्तयोगात्प्राणव्यपरो-
पणं हिंसा ॥८॥ असदभिधानमन-
तम् ॥९॥ अदत्तादानं स्तेयम् ॥१०॥
मैथुनमब्रह्म ॥ ११ ॥ मूर्छा परिग्रहः
॥१२॥ निःशल्यो व्रती ॥१३॥ अगा-
र्यनगारश्च ॥१४॥ अणुव्रतोऽगारी१५
॥ दिग्देशानर्थदण्डविरतिसामायिक-
पौषधोपवासोपभोगपरिभोगपरिमा-

पातिथिसंविभागव्रतसंपन्नश्च ॥१६॥
मारणांतिकीं संलेखनां जोषिता १७
॥ शंकाकांक्षाविचिकित्सान्यदृष्टिप्र-
शंसासंस्तवाः सम्यग्दृष्टेरतिचाराः
॥१८॥ व्रतशीलेषु पंच पंच यथाक्र-
मम् ॥१९॥ बंधवधछविच्छेदातिभा-
रारोपणान्नपाननिरोधाः ॥२०॥ मि-
थ्योपदेशरहस्याभ्याख्यानकूटलेख-
क्रियान्यासापहारसाकारमंत्रभेदाः
॥२१॥ स्तेनप्रयोगतदाहृतादानवि-
रुद्धराज्यातिक्रमहीनाधिकमानोन्मा-
नप्रतिरूपकव्यवहाराः ॥ २२ ॥ पर-

विवाहकरणत्वरपरिगृहीतागमनानं-
गक्रीडातीव्रकामाभिनिवेशाः ॥२३॥
क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदा-
सीदासकुप्यप्रमाणातिक्रमाः॥२४॥ऊ-
र्ध्वाधस्तिर्यग्व्यतिक्रमःक्षेत्रवृद्धिस्मृ-
त्यंतराधानानि ॥२५॥ आनयनप्रेष्य-
प्रयोगशब्दरूपानुपातपुद्गलप्रक्षेपाः२६
कंदर्पकौत्कुच्यमौखर्यासमीक्ष्याधिक-
रणोपभोगाधिकत्वानि ॥२७॥ योग
दुःप्रणिधानानादरस्मृत्यनुपस्थापना-
नि ॥ २८ ॥ अप्रत्यवेक्षिताप्रमा-
र्जितोत्सर्गादाननिक्षेपसंस्तारोपक्र-

मणानादरस्मृत्यनुपस्थानानि। २९। सचित्तसंबद्धसंमिश्राभिषवदुःपक्वाहाराः ॥ ३० ॥ सचित्तनिक्षेपपिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥३१॥ जीवितमरणाशंसामित्रानुरागसुखानुबंधनिदानकरणानि ॥३२॥ अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥३३॥ विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३४ ॥

॥ इति सप्तमोऽध्यायः ॥

। अथ अष्टमोऽध्यायः ।

मिथ्या-दर्शनाविरतिप्रमादकषाय-योगा बंधहेतवः ॥१॥ सकषायत्वा-ज्जीवः कर्मणो योग्यान्पुद्गलानादत्ते ॥२॥ सबंध ॥ ३ ॥ प्रकृतिस्थित्यनु-भाव-प्रदेशास्तद्विधयः ॥ ४ ॥ आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीया-युष्कनामगोत्रांतरायाः ॥५॥ पंचन वद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्वि-पंचभेदा यथाक्रमम् ॥६॥ मत्यादी-नां ॥ ७ ॥ चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचला

स्त्यानगृद्धिवेदनी यानि च ।८। सद-सद्वेद्ये ॥ ९ ॥ दर्शनचारित्रमोहनीयकषायनोकषायवेदनीयाख्यास्त्रिद्विषोडशनवभेदाः सम्यक्त्वमिथ्यात्वतदुभयानिकषायनोकषायावनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदाः ॥ १० ॥ नारकतैर्यग्योनमानुषदैवानि ॥११॥ गतिजातिशरीरांगोपांगनिर्माणबंधनसंघातसंस्थानसंहननस्पर्शरसगं-

घवर्णानुपूर्व्यगुरुलघुपघातपराघाता
तपोद्योतोच्छ्वासविहायोगतयः प्र-
त्येकशरीरत्रससुभगसुस्वरशुभसू-
क्ष्मपर्याप्तस्थिरादेययशांसिसेतराणि
तीर्थकृत्वंचेति॥१२॥उच्चैर्नीचैश्च ॥१३॥
दानादीनामंतरायः॥ १४ ॥ आदित-
स्तिसृणामंतरायस्य च त्रिंशत्सा
गरोपमकोटीकोटयः परा स्थितिः
॥१५॥ सप्ततिर्मोहनीयस्य ॥ १६ ॥
नामगोत्रयोर्विंशतिः॥१७॥त्रयस्त्रिंशत्-
सागरोपमाण्यायुष्कस्य(त्रयस्त्रिंशत्सा
गराण्य धिकान्यायुष्कस्य) ॥ १८ ॥

अपरा द्वादश मुहुर्त्तावेदनीयस्य १९ ॥ नामगोत्रयोरष्टौ ॥२०॥ शेषाणा-मंतर्मुहूर्त्तम् ॥२१॥ विपाकोऽनुभाव: ॥२२॥ सयथानाम ॥ २३ ॥ ततश्च निर्जरा ॥२४॥ नाम:प्रत्यया: सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाढस्थिता: सर्वात्मप्रदेशेष्वनंतानंतप्रदेशा: ॥२५॥ सद्वेद्यसम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्राणिपुण्यम् २६।

। इति अष्टमोऽध्याय: ।

॥ अथ नवमोऽध्याय ॥

आस्रवनिरोधः संवरः ॥१॥ स गु-
प्तिसमितिधर्मानुप्रेक्षापरिषहजयचा-
रित्रैः ॥२॥ तपसा निर्जरा च ॥ ३ ॥
सम्यग्योगनिग्रहो गुप्तिः ॥४॥ इर्या-
भाषैषणादाननिक्षेपोत्सर्गाः समि-
तयः ॥५॥ उत्तमः क्षमामार्दवार्ज-
वशौचसत्यसंयमतपस्त्यागाकिंचन्य-
ब्रह्मचर्याणि धर्मः ॥ ६ ॥ अनित्या-
शरणसंसारैकत्वान्यत्वाशुचित्वास्रव-
संवरनिर्जरालोकबोधिदुर्लभधर्मस्वा-
ख्याततत्वानुचिंतनमनुप्रेक्षाः॥७॥

मार्गाच्यवननिर्जरार्थं परिषोढव्याः
परिषहाः ॥ ८ ॥ क्षुत्पिपासाशी-
तोष्णदंशमशकनाग्न्यारतिस्त्रीचर्या-
निषद्याशय्याक्रोशवधयाचनालाभ-
रोगतृणस्पर्शमलसत्कारपुरस्कारप्र-
ज्ञाज्ञानदर्शनानि ॥ ९ ॥ सूक्ष्मसं-
परायछद्मस्थवीतरागयोश्चतुर्दश ॥१०॥
एकादश जिने ॥११॥ बादरसंपराये
सर्वे ॥ १२ ॥ ज्ञानावरणे प्रज्ञाज्ञाने
॥१३॥ दर्शनमोहांतराययोरदर्शना-
लाभौ ॥१४॥ चारित्रमोहे नाग्न्या-
रतिस्त्रीनिषद्याक्रोशयाचनासत्कारपु-

रस्कारा: १५॥ वेदनीये शेषा: १६॥ एकादयो भाज्या युगपदेकोनविंशतिः ॥१७॥सामायिकछेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातानि चारित्रम् ॥ १८ ॥ अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥ १९ ॥ प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥२०॥ नव चतुर्दश पंच द्विभेदं यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥ आलोचनप्रतिक्रमणतदुभयविवेक-

व्युत्सर्गतपश्छेदपरिहारोपस्थापनानि २२॥ ज्ञानदर्शनचारित्रोपचाराः २३॥ आचार्योपाध्यायतपस्विशैक्षग्लानगणकुलसंघसाधुमनोज्ञानाम् २४ वाचनापृच्छनाऽनुप्रेक्षाम्नायधर्मोपदेशाः॥२५। बाह्याभ्यंतरोपध्योः २६॥ उत्तमसंहननस्यैकाग्रचिंतानिरोधो ध्यानम् ॥२७॥ आमुहूर्त्तात् ॥२८॥ आर्त्तरौद्रधर्म्यशुक्लानि ॥२९॥ परे मोक्षहेतू ॥३०॥ आर्त्तममनोज्ञानां संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥३१॥ [illegible] ॥३२॥

विपरीतं मनोज्ञानाम् । ३३॥ निदानं
च कामोपहतचित्तानां पुनः ॥ ३४ ॥
तदविरतदेशविरतप्रमत्तसंयतानाम्
॥३५॥ हिंसाऽनृतस्तेयविषयसंरक्षणे-
भ्यो रौद्रमविरतदेशविरतयोः ३६ ।
आज्ञाऽपायविपाकसंस्थान विचयाय
धर्म्ममप्रमत्तसंयतस्य ॥३७॥ उपशां-
तक्षीणकषाययोश्च ॥ ३८ ॥ शुक्ले
चाद्ये ॥ ३९ ॥ कषेचाद्ये पूर्वविदः
पूर्वविदः॥४०॥ परे केवलिनः ॥ ४१ ॥
पृथक्त्वैकत्ववितर्क : दमक्रियाप्रति-
पातिव्युपरतक्रियानिवृत्तीनि ॥४२॥

तत् त्र्येककाययोगायोगानाम् ॥४३॥
एकाश्रये सवितर्के पूर्वे ॥४४॥ अवि-
चारं द्वितीयम् ४५ वितर्कः श्रुतम ४६
विचारोऽर्थव्यंजनयोर्योगसंक्रांतिः४७
सम्यग्दृष्टिश्रावकविरतानंतवियोज-
कदर्शनमोहक्षपकोपशमकोपशांत-
मोहक्षपकक्षीणमोहजिनाः क्रमशो-
ऽसंख्येयगुणनिर्जराः ४८॥ पुलाकब-
कुशकुशीलनिर्ग्रंथस्नातका निर्ग्रंथाः॥
४९॥ संयमश्रुतप्रतिसेवनातीर्थलिंग-
लेश्योपपातस्थानविकल्पतः साध्याः
॥ ५० ॥ ॥ इति नवमोऽध्यायः ॥

। अथ दशमोध्यायः ।

मोहक्षयाज् ज्ञानदर्शन वरणांतरायक्षयाच्च केवलम् ॥१॥ बंधहेत्वभावनिर्जराभ्याम् ॥ २ ॥ कृत्स्नकर्मक्षयो मोक्षः ॥ ३ ॥ औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥ तदनंतरमुर्ध्वं गच्छत्यालोकांतात् ।५॥ पूर्वप्रयोगादसंगत्वाद्बंधछेदात्तथागतिपरिणामाच्च तद्गतिः॥६॥ क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनांतरसंख्याल्प-

बहुत्वतः साध्याः ॥७॥

॥ इति दशमोऽध्यायः ॥

॥ इति तत्वार्थसूत्र संपूर्णम् ॥



अथ श्रीमदाचार्यश्रीआनन्दसागरसूरि-
विरचितं.
श्री तत्त्वार्थपरिशिष्टम् ।



सम्यां पञ्चधनुःशतमानं वपुः॥१॥ अर्वागर्धार्धं आद्यादिप्रस्तटे हस्तत्रयं॥२॥ विरहश्चतुर्विंशतिमुहूर्तसप्तपञ्चदशदिनैकद्विचतुःषण्मासाः ॥३॥

द्रव्यादे[illegible] सेवार्तार्[illegible]:।४। त[illegible]त्वाश्चक्रि-
ह[illegible] गलाद्जिनयतिदेशसम्यक्त्व-
वन्तः।५।चत्वार्यर्धचत्वारि गव्यूतान्य-
वधिराद्ये परापरः।६।परतोऽर्धार्धगव्यू-
१ २ ३ ४ ५
तहीनंवर्विंशतिदशाष्टशतच[illegible]र्दशाष्ट-
६ ७ ८ ९ १० ११ १२
शतद्विचतुरष्टश[illegible]चतुर्द्विंशत्यष्टश-
१३ १४ १५ १६ १७ १८ १९
तदशविंशत्यष्टशतदशचतुः षट्दश-
२० २१ २२ २३ २४ २५ २६
दशविंशतिदशपञ्चदशविंशत्यष्टश-
२७ १ २ ३ ४
तविंशतिसिद्धिः स्त्रीनपुंसकपुरुषगृह-
५ ६ ७ ८ ९ १०
न्यस्वलिंगगुरुलघुमध्यावगाहोर्ध्वा-
११ १२ १३ १४ १५
धस्तिर्य[illegible]नरकति[illegible] नरामरत्रि-

१६ १७ १८ १९
पृथ्वीजूदकद्वयवनस्पतितिर्यक्तिर्य-
२० २१ २२ २३ २४
क्स्त्रीना । व्यन्तर । न्ततद्देवीज्योति-
२५ २६ २७
ष्कत । वीवैमा निकतद्देवीभ्यः ॥ ७ ॥
१ २ ३ ४
द्वात्रिंशदष्टचत्वारिंशत्षष्टिद्वासप्तति-
५ ६ ७ ८
चतुरशीतिषण्णवतिद्व्यष्टाधिकसिद्धि-
रष्टादिषु समयेषु ॥ ९ ॥ द्वाविंशतिसप्त-
त्रिदशवर्षसहस्रत्रिदिनद्वादशवर्षैको
नपञ्चाशद्दिनषण्मासत्रिपल्यायुषः पृ-
थ्व्यब्वायुवनस्पत्यग्निद्वित्रिचतुष्प-
ञ्चेन्द्रियाः ॥ १० ॥ परमाणवोऽनन्ताः
त्रसरेणुरथरेणुवालाग्रलिक्षायूकायवा-

क्षुल्ला अष्टगुणाः॥११॥ द्वादशसप्तत्रि-
ःप्ताष्टाविं ।तिसप्ताष्टनवार्धत्रयोद-
शद्वादशदशदशनवद्वादशषड्विंशति-
पञ्चविंशतिल ।ः ।लकाटयः पृथ्व्य-
प्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रिय-
जल च ष्पदोरोभुजप सर्पनरा
मरनिरयेषु॥१२॥अष्टोच्चा द्वादश चतु-
र्मूलोपरि पृथुला जगत्यः॥१३॥द्विपा ग-
व्यूतो ।यामा वेदिका द्वययो-
जनवनशिरस्काः ॥१४॥ एकद्विचतुः
शतयोजनो । हिमवन्महाहिमव-

निषधा शिखरिरुक्मिनीलाः॥ १५॥ आविदेहेभ्यो द्विगुण भरतयतो वर्षव-र्षधराणां व्यायामः॥१६॥ ह्रदाः सदे-व्यावासकमलाः गिर्युच्चत्वदशगुणदै-र्घ्या अर्धविस्तीर्णा दशयोजनोद्रूधाः ।१७। गङ्गासिन्धू रोहितांशारोहिते हरिकान्ताहरिसलिले सीतोदासीते नरकान्ता॰ ारीकान्ते सुवर्णरूप्यकूले रक्तारक्तवत्यौ भरतादिषु पूर्वपश्चि-मोदधिगे ॥ १८ ॥ अपविदेहेभ्यो [illegible]णपरिवारा भरयतः॥१९॥ चतु-दशस [illegible]स्राणि आदौ॥२०॥ विदेहेषु

चतुर्दशसहस्रपरिवारा द्वात्रिंशद्वि-
जया द्विनदीका ॥ २१ ॥ युग्मक्षेत्रे
चतुरशीतिसहस्रनदीके ॥ २२ ॥
षडन्तराः ॥२३॥ चतुस्त्रिंशद्वैताढ्य-
विद्युत्प्रभनिषधनीलमाल्यवत्सुरगि-
रिषु नव नव कूटाः ॥ २४ ॥ सौ-
मनसगन्धमादनयोः सप्त ॥ २५ ॥
रुक्मिमहाहिमवतोरष्ट ॥२६॥शिख-
रिहिमवतोरेकादश ॥ २७ ॥ षोड-
शसु वक्षस्कारेषु चत्वारः ॥ २८ ॥
शतद्वयं कनकगिरीणां॥२९॥चत्वारो
वृत्तवैताढ्याः ॥ ३० ॥ द्वौ चित्रवि-

चित्रौ ॥३१॥ द्वौ यमकसमकौ ॥३२॥
१ २ ३
सुषमसुषम सुषम सुषमदुष्षम दु-
४ ५ ६
ष्षमसुषम दुष्षम दुष्षमदुष्षमा-
राश्चतुस्त्रिद्विद्विचत्वारिंशत्सहस्रोनै-
कसाग कोटीकोट्यैकविं शत्यकविं-
शतिस सवर्षमानाः ॥ ३३ ॥ देव-
कुरूत्तरकुर्वौ रम्यकहरिवर्षयो रएय
वतैहमवतोर्विदेहेषु प्रथमप्रतिज्ञा-
गाद्याः ॥३४॥ त्रि येकपल्य जीविताः
त्रिद्वयेककोशास्त्रिद्वयेकदिनतूवरीबद
रामलका राः षड्पञ्चाशदधिकशात
दयार्धार्ध ष्ठकरंमका कानपञ्चा-

शतञ्चदशाधिकाऽपत्यपालना युग्मि
नः ॥३५॥ पूर्वकोटी त्रिंशदधिक ।त-
विंशतिवर्षजीविताः क्रोशपादन्-
प्तद्दि स्तोच्छ्रयाः तूर्या षु ॥३६॥
नरतैरावतयोः षट् ॥३७॥ षन्त्तर-
शतच ष्काधिकपञ्चत्रिंशत्स स्राया
मा विजयाः षोडशाः ॥ ३८ ॥ चतु-
श्चत्वारिंशदधिकाष्टपञ्चाशच्छतानि
वन स्त्रद्वयं ॥ ३९ ॥ पञ्चाशदधिक-
शतकं नद्यः ॥४०॥ व स्कारा-
श्चतुः सहस्री ॥ ४१ ॥ द्वाविंशतिः
सहस्राणि वनं ॥४२॥ दशसहस्राणि

मेरुः ॥४३॥ उत्त द[illegible]णताऽर्धतृती-
यशते ॥ ४४ ॥ वहिश्चतुरंतः पंचश-
तोच्चा गजगिरयः ॥४५॥ षट्चतुश्च
तुरष्ट क्रमात् देव्यः॥४६॥पंचासुरयोः
॥ ४७ ॥ ऊर्ध्वं परिगृहीतेतराणां प-
ल्यमधिकं सप्तपञ्चाशन्नवपञ्चपञ्चा-
शत् द्वयोः ॥ ४८ ॥ द्वयोस्त्रयोदश
द्वयोर्द्वादश षट् पञ्च चत्वारश्चत्वारो
द्वयोश्चत्वारि दशोपरि प्रस्तटाः ॥४९
आद्यद्वयं उत्कृष्टानेजप्रत न्नक्तेष्ट-
प्रतरगुण ॥ ४९ ॥ शेषेषु विश्ले-
अ
षस्य साधस्तना पुनः ॥ ४९ ॥
ब

त्र्यस्रच्[illegible]रस्रवृत्ता दिक्षु द्वाषष्टिरुप-
र्येकक[illegible]ीना विमानाः।५०।वृत्तमिंद्रकं
मध्ये।५१। स्वयंभूद्वीपे षोडश।५२। न
प्रागाद्यां पुष्पावकीर्णाः ॥५३॥ षट्
सहस्राणि सामानिकाः॥५४॥ चतुः
षष्टिः षष्टिश्चासुरयोः ॥ ५५ ॥ चतु-
र्गुणा आत्मरक्षाः ॥५६॥ व्यन्तराणां
चत्वारि ॥५७॥ चतुस्त्रिंशच्चतुश्चत्वा-
रिंशदष्टत्रिंशत् पंचकृत्वः चत्वारिंशत्
पञ्चाशच्चत्वारिंशल्लक्षा उत्तरतश्चतुर्ल
क्षहीनाः भवनाः ॥ ५८ ॥ चूडाम-
णिफणिगरुडवज्रकलशसिंहाश्वा[भि-

षेक]गजमक वर्धमानांकाः ॥ ५९॥
समभुवो दशोनाष्टशत्यास्तारकाः६०
ततो दशाशीतिचतुश्चतुस्त्रित्रित्रिषु
अधिकेषु रविचन्द्रनक्षत्रबुधशुक्रजी-
वमङ्गलशनैश्चराः ॥६१॥ एकषष्ट्यंशाः
षट्पञ्चाशदष्टचत्वारिंशच्चन्द्रसूर्यया-
र्विमानाः॥६२॥शेषा द्व्येकार्धगव्यूताः
॥ ६३ ॥ यथोत्तरं शीघ्राः ॥ ६४ ॥
तारांतं परं द्वादशसहस्राणि शते
द्विचत्वारिंशच्च ॥ ६५ ॥ चन्द्रसूर्या
द्विचः द्वादश जम्बूद्वीपादिषु ॥ ६६ ॥
ततस्त्रिगुणाः पूर्वयुताः ॥ ६७ ॥ पश्च-

दशाचतुरशीतिशतं मण्डलानि॥६८॥ जम्बव : शतेऽशीते पञ्च पञ्चषष्टिः ६९ समयशतवर्षप्रदेशैर्वालाग्रैः पल्यमुद्धाराद्धात्राख्यं ॥ ७० ॥ पनकासङ्ख्येयग लक्षएकैः : दमम् ॥ ७१ ॥ दश कोटाकोटयः सागरः ॥ ७२ ॥ सार्धद्वयोद्धारसाग समयमानाः द्वीपाब्धयः ॥ ७३ ॥ द्वात्रिंशदष्टाविंशतिद्वादशाष्टचतुर्लक्षपञ्चा ।चत्वारिंशत्षट्सहस्र चतुस्त्र्येकादशसप्ताधिकैकशतपञ्च विमाना ऊर्ध्वलोके ॥७४॥ एक ।रप्राकारावृता वृत्ताः ॥ ७५ ॥

च[illegible] द्वाराः सर्वतो वेदिकाश्चतुरस्राः
॥ ७६ ॥ त्रिद्वारा वृत्तच[illegible]रस्त्रासन्नवे-
दिका प्राकारावृताः त्र्यस्राः ॥ ७७ ॥
मृगम[illegible]षवराहसिंहाजदर्दुरहयग-
जभुजगखगवृषभविकिमाङ्काः ७८
चतुरशीत्यशीतिद्वासप्ततिसप्ततिष-
ष्टिपञ्चाशच्चत्वारिंशत्त्रिंशद्विंशतिदश-
त[illegible]स्राः सामानिकाः ॥७९॥ द्वित्रि-
त्रिशेषा घनोदधिवातोभयाकाशप्र-
तिष्ठाः ॥ ८० ॥ द्वयोर्द्वात्रिंशच्छतयो-
जनानि पृथ्वीविमानबाहल्यं ॥८१॥
द्विद्विद्विच[illegible]र्नवपञ्चस्वकैकशतश्चराणृ

त्तिः ॥ ८२ ॥ द्विद्विद्विद्विशेषेषु पञ्च-
चतुस्त्रिद्विश्वेतवर्णाः ॥८३॥ सौधर्ममा-
हेन्द्रलांतकसहस्राराच्युतग्रैवेयकलो
कान्ता एकादिरज्ज्वाः ॥८४॥ आ
ईशानात्सप्तहस्तं वपुः ॥८५॥ द्विद्वि-
द्विचतुर्ग्रैवेयकानुत्तरेष्वेकैकहीनं ।८६।
मध्ये प्रत्यतरं जघन्यादेकादशैकन्ना
गाधिकं ॥८७॥ द्वादशमुहूर्त्ता उप-
पातविरहः ॥ ८८ ॥ आ ईशानाश्च-
तुर्विंशतिः ॥ ८९ ॥ त्रिन्नागोनदश
सत्रिन्नागद्वादश सार्धद्वाविंशति पञ्च-
चत्वारिंशदशीतिशतदिना ऊर्ध्वमूए०

द्वयोर्द्वयोस्त्रिषु त्रिषु त्रिषु विजयादिषु सर्वार्थे च सङ्ख्यातमासवर्षर्त्तु तसहस्रदशवर्षपल्यासंख्यसंख्यभागाः ॥ ९१ ॥ तापसपरिव्राजकतिर्यक्श्राद्धमिथ्यादृष्टियतिसंयतानां ज्योतिष्कब्रह्मलोकसहस्राराच्युतग्रैवेयकसर्वार्थेषु॥९२॥तापसश्चान्यस्यश्राद्धचतुर्दशपूर्विणां व्यन्तरसौधर्मसौधर्मलान्तकेष्वपरः॥९३॥ सेवार्त्तकीलिकाऽर्धनाराचनाराचवर्षभनाराचवज्रर्षभनाराचैश्चतुःषट्कष्टदशद्वादशसिद्धयः॥९४॥ त्रिपल्यत्रित्रयोदशसागरमायुः श्वा-

ग्यद्वयसनत्कुमारलान्तकाधः किल्बि-
षिकानां ॥ ९५॥ प्राणस्तोकलवमु-
हूर्त्तदिनमासाः सप्त सप्त सप्तसप्त-
ति त्रिंशत्त्रिंशद्द्वादशगुणाः स्तोकल-
वमुहूर्त्तदिनमासवर्षाः।९६। जघन्या-
श्चतुर्थस्तोकसप्तकाभ्यामाहारोच्छ्-
वासौ ॥९७॥ आसागरात् दिवसमुहू-
र्त्तपृथक्त्वाभ्यां९८परतोऽतरसमप -
वर्षसहस्राभ्यां९९ द्विद्विद्विद्विचतुःषट्-
त्रि । वेयकवासिनोऽत्र: प्रथमाद्याः वि
षयाः१००पश्चानां संभिन्न लोकनाडिः
।१०१। नवतिसहस्रलक्षवर्षपूर्वकोटी

सागरदशनवभागाद्या आद्या नरक-
प्रस्तटेष्वायुः १०२ अशीतिद्वात्रिंश-
दष्टाविंशतिर्विंशत्यष्टादशषोडशाष्ट-
सहस्राधिकलक्षपिण्डाः १०३ विंशतिः
सहस्राणि घनोदधिः १०४ षडर्धपञ्च-
मसार्धयोजनैर्घनाम्बुघनतनुवातैर्वल-
यं ॥१०५॥ योजनत्रिभागैकत्रिभाग-
गव्यूतवृद्धं क्रमात् १०६ त्रिंशत्पञ्च-
विंशतिपञ्चदशदशत्रिपञ्चोनैकलक्ष-
पञ्चावासाः ।१०७। द्विद्विर्हीनास्त्रयो-
दश प्रस्तटाः । १०८ । दद्वेकोनप-
ञ्चाशदष्टचत्वारिंशद्विदिक्षु । १०९ ।
विष्कम्भवर्गदशगुणमूलं परिधिः ११०

पादगुणोऽसौ गणितपदं ॥ १११ ॥
बीषुपृथक्त्व चतुर्गुणेषुगुणमूलं जीवा
॥ ११२ ॥ इषुवर्गषड्गुणजीवावर्गयु-
तमूलं धनुः॥११३॥अन्त्येषु जीवागुण
चतुर्न्नेकवर्गदशगुण मूलं प्रतरः।११४।
हिमवच्छिखरिणोःशतत्रुध्वाब्धि तादि-
विष्कम्भा अन्तरद्वीपाः वृत्ताः प्र-
तिकोणं सप्त।११५। पल्यासंख्यांशा -
योजनदशमांशतनुचतुर्थन्नोजिचतुः
षष्टिपृष्ठकोन्नाशीतिदिनाप नपालना
युग्मिनः ॥११६॥ लवण आपञ्चनव-
तिसहस्रेभ्यः सहस्रावगाढः सप्त-
शतोच्छ्रयः।११७। मध्ये शिखा सप्तदश

सहस्राणि ॥११८॥ याम्योत्त रायता द्विसहस्रपृथुत्वौ पञ्चशतोच्चौ इषुगिरी धातकीपुष्करार्धयोः । ११९ ।

स्वपराभासि ज्ञानं प्रमाणं ।१२०। अनाक्षेप एक धर्मको वक्त्राभिप्रायो नयः ॥१२१॥ उपशमो मोहे मिश्रो घातिषु क्षयः सर्वेषु औदयिकपारिणामिकौ च ।१२२। जघन्याद्यस्य - भव्यानन्तगुणाणुकावर्गणा॥ १२३ ॥ सर्वाः स्वानन्तभागवृद्धाः १२४ सिद्धानन्तांशाधिका अग्रहणाः ।१२५।

॥ इति तत्त्वार्थ परिशिष्टं संपूर्णं ॥

समाप्त.

आर्त्तध्यानथी बचवानो उपाय.

गते शोको न कर्त्तव्यो, भविष्यं नैव शोचयेत्:
वर्तमानेन योगेन, वर्त्तन्ते हि विचक्षणाः १

लक्ष्मीनुं खरुं सार्थक्य.

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः;
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः. २

भावार्थः—नदीओ पोते पाणी पीती नथी, वृक्षो पोते फळो खाता नथी अने वर्षाद (पोते) धान्य खातो नथीज. (पण) ए सर्व परने माटेज होय छे (तेम) सज्जनोनी संपत्ति (पण) परोपकारना माटे होय छे.